# Shri Rudrakritam Shrikrishna Stotram

# શ્રીરુદ્રકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

## Document Information

Text title : Shri Rudrakritam 2 Shrikrishna Stotram

File name : rudrakRRitaM2shrIkRRiShNastotram.itx

Category : vishhnu, vishnu, krishna, bhAgavatapurANa, stotra

Location : doc_vishhnu

Proofread by : PSA Easwaran

Description/comments : bhAgavatapurANa | adhyAya 10/63/34-45||

Latest update : October 1, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 4, 2025

*sanskritdocuments.org*

# શ્રીરુદ્રકૃતં શ્રીકૃષ્ણસ્તોત્રમ્

શ્રીરુદ્ર ઉવાચ ।
ત્વં હિ બ્રહ્મ પરં જ્યોતિર્ગૂઢં બ્રહ્મણિ વાઙ્મયે ।
યં પશ્યન્ત્યમલાત્માન આકાશમિવ કેવલમ્ ॥ ૩૪॥

નાભિર્નભોઽગ્નિર્મુખમમ્બુ રેતો
દ્યૌઃ શીર્ષમાશાઃ શ્રુતિરઙ્ઘ્રિરુર્વી ।
ચન્દ્રો મનો યસ્ય દૃગર્ક આત્મા
અહં સમુદ્રો જઠરં ભુજેન્દ્રઃ ॥ ૩૫॥

રોમાણિ યસ્યૌષધયોઽમ્બુવાહાઃ
કેશા વિરિઞ્ચો ધિષણા વિસર્ગઃ ।
પ્રજાપતિર્હૃદયં યસ્ય ધર્મઃ
સ વૈ ભવાન્ પુરુષો લોકકલ્પઃ ॥ ૩૬॥

તવાવતારોઽયમકુણ્ઠધામન્
ધર્મસ્ય ગુપ્ત્યૈ જગતો ભવાય ।
વયં ચ સર્વે ભવતાનુભાવિતા
વિભાવયામો ભુવનાનિ સપ્ત ॥ ૩૭॥

ત્વમેક આદ્યઃ પુરુષોઽદ્વિતીય-
સ્તુર્યઃ સ્વદૃગ્ઘેતુરહેતુરીશઃ ।
પ્રતીયસેઽથાપિ યથાવિકારં
સ્વમાયયા સર્વગુણપ્રસિદ્ધ્યૈ ॥ ૩૮॥

યથૈવ સૂર્યઃ પિહિતશ્છાયયા સ્વયા
છાયાં ચ રૂપાણિ ચ સઞ્ચકાસ્તિ ।
એવં ગુણેનાપિહિતો ગુણાંસ્ત્વ-
માત્મપ્રદીપો ગુણિનશ્ચ ભૂમન્ ॥ ૩૯॥

યન્માયામોહિતધિયઃ પુત્રદારગૃહાદિષુ ।
ઉન્મજ્જન્તિ નિમજ્જન્તિ પ્રસક્તા વૃજિનાર્ણવે ॥ ૪૦॥

દેવદત્તમિમં લબ્ધ્વા નૃલોકમજિતેન્દ્રિયઃ ।
યો નાદ્રિયેત ત્વત્પાદૌ સ શોચ્યો હ્યાત્મવઞ્ચકઃ ॥ ૪૧॥

યસ્ત્વાં વિસૃજતે મર્ત્ય આત્માનં પ્રિયમીશ્વરમ્ ।
વિપર્યયેન્દ્રિયાર્થાર્થં વિષમત્ત્યમૃતં ત્યજન્ ॥ ૪૨॥

અહં બ્રહ્માથ વિબુધા મુનયશ્ચામલાશયાઃ ।
સર્વાત્મના પ્રપન્નાસ્ત્વામાત્માનં પ્રેષ્ઠમીશ્વરમ્ ॥ ૪૩॥

તં ત્વા જગત્સ્થિત્યુદયાન્તહેતું
સમં પ્રશાન્તં સુહૃદાત્મદૈવમ્ ।
અનન્યમેકં જગદાત્મકેતં
ભવાપવર્ગાય ભજામ દેવમ્ ॥ ૪૪॥

અયં મમેષ્ટો દયિતોઽનુવર્તી
મયાભયં દત્તમમુષ્ય દેવ ।
સમ્પાદ્યતાં તદ્ભવતઃ પ્રસાદો
યથા હિ તે દૈત્યપતૌ પ્રસાદઃ ॥ ૪૫॥

ઇતિ શ્રીમદ્ભાગવતમહાપુરાણે દશમસ્કન્ધે ઉત્તરાર્ધે ત્રિષષ્ટિતમાધ્યાયાન્તર્ગતં
શ્રીરુદ્રકૃતં શ્રીકૃષ્ણસ્તોત્રં સમાપ્તમ્ ।

ભાગવતપુરાણ । અધ્યાય ૧૦/૬૩/૩૪-૪૫॥

bhAgavatapurANa . adhyAya 10/63/34-45..

Proofread by PSA Easwaran

*Shri Rudrakritam Shrikrishna Stotram*

pdf was typeset on October 4, 2025

Please send corrections to *sanskrit@cheerful.com*